## तृतीयः पाठः


# अकारान्त-नपुंसकलिङ्गः



एतत् किम्?
एतत् खनित्रम् अस्ति?
श्रमिका खनित्रं चालयति।

तत् किम्?
तत् विश्रामगृहम् अस्ति।
किम् अत्र भित्तिकम् अस्ति?
अत्र भित्तिकं न अस्ति।









एते के?
एते अङ्गुलीयके स्तः।
सुवर्णकारः अङ्गुलीयके रचयति।

ते के?
ते बसयाने स्तः।
ते बसयाने कुत्र गच्छतः?
ते रेलस्थानकं गच्छतः।








एतानि कानि?
एतानि करवस्त्राणि सन्ति।
किम् एतानि पुराणानि?
न, एतानि तु नूतनानि।



तानि कानि?
तानि कदलीफलानि सन्ति।
किं तानि मधुराणि?
आम्, तानि मधुराणि पोषकाणि च।



## शब्दार्थाः

| | | | |
|---|---|---|---|
| **एतत्** (नपुं.) | – | यह | it |
| **विश्रामगृहम्** | – | विश्रामालय | rest house |
| **अत्र** | – | यहाँ | here |
| **भित्तिकम्** | – | घेरा, दीवार | fence, wall |
| **खनित्रम्** | – | कुदाल, खन्ती | digging axe |
| **श्रमिका** | – | मजदूरनी | female labour |
| **चालयति** | – | चलाती है | moves/uses |
| **एते** | – | ये दोनों | these two |
| **बसयाने** | – | दो बसें | two buses |



| | | | |
|---|---|---|---|
| कुत्र | - | कहाँ | where |
| गच्छतः | - | जा रहे हैं/जा रही हैं | are going |
| रेलस्थानकम् | - | स्टेशन | railway station |
| अङ्गुलीयके | - | दो अँगूठियाँ | two rings |
| स्तः | - | हैं | are |
| सुवर्णकारः | - | सुनार/सोनार | goldsmith |
| एतानि | - | ये (नपुं., बहु.) | these |
| कदलीफलानि | - | केले के फल | bananas |
| मधुराणि | - | मीठे/अच्छे | sweet |
| पोषकाणि | - | पोषक | naurishment |
| करवस्त्राणि | - | रुमाल | handkerchiefs |
| पुराणानि | - | पुराने | old |
| नूतनानि | - | नये | new |


## अभ्यासः




1. (क) उच्चारणं कुरुत।

| | | | |
|---|---|---|---|
| फलम् | गृहम् | पात्रम् | पुष्पम् |
| द्वारम् | विमानम् | कमलम् | पुस्तकम् |
| सूत्रम् | छत्रम् | भवनम् | जलम् |






**( ख ) चित्राणि दृष्ट्वा पदानि उच्चारयत।**




पर्णम्




क्रीडनकम्




नारिकेलम्




सङ्गणकम्



वातायनम्



सोपानम्



उद्यानम्



उपनेत्रम्




कङ्कतम्

**2. ( क ) वर्णसंयोजनं कृत्वा पदं कोष्ठके लिखत–**

यथा– प् + अ + र् + ण् + अ + म् = पर्णम्

ख् + अ + न् + इ + त् + र् + अ + म् = ______

प् + उ + र् + आ + ण् + आ + न् + इ = ______



प् + ओ + ष् + अ + क् + आ + ण् + इ = 

क् + अ + ङ् + क् + अ + त् + अ + म् = 

## ( ख ) अधोलिखितानां पदानां वर्णविच्छेदं कुरुत-

**यथा-** व्यजनम् = व् + य् + अ + ज् + अ + न् + अ + म्

पुस्तकम् = ....................................................................


भित्तिकम् = ....................................................................


नूतनानि = ....................................................................


वातायनम् = ....................................................................


उपनेत्रम् = ....................................................................


## 3. चित्राणि दृष्ट्वा संस्कृतपदानि लिखत-


.....................


.....................



.....................


.....................


.....................


.....................






**4.** **चित्रं दृष्ट्वा उत्तरं लिखत-**




**यथा-** किं पतति?

..............................



मयूरौ किं कुरुतः।

..............................



एते के स्तः?

..............................



बालिकाः किं कुर्वन्ति?

..............................



कानि विकसन्ति?

..............................



**5. निर्देशानुसारं वाक्यानि रचयत–**

| | | | | |
|---|---|---|---|---|
| यथा– | एतत् पतति। | (बहुवचने) | – | एतानि पतन्ति। |
| (क) | एते पर्णे स्तः। | (बहुवचने) | – | .............................. |
| (ख) | मयूरः नृत्यति। | (बहुवचने) | – | .............................. |
| (ग) | एतानि यानानि। | (द्विवचने) | – | .............................. |
| (घ) | छात्रे लिखतः। | (बहुवचने) | – | .............................. |
| (ङ) | नारिकेलं पतति। | (द्विवचने) | – | .............................. |

**6. उचितपदानि संयोज्य वाक्यानि रचयत–**

| | |
|---|---|
| कोकिले | विकसति |
| पवनः | नृत्यन्ति |
| पुष्पम् | उत्पतति |
| खगः | वहति |
| मयूराः | गर्जन्ति |
| सिंहाः | कूजतः |

